मित्रभ्रात्यार्थसंक्षयः। वैनाशिके विनाशः स्यात् देहद्रविणसम्पदाम्"। नाडीनक्षत्रफलम्। "जातिभे कुलनाशः स्यादृक्षनक्षत्राभिषेकभे। देशभे देशभङ्गः स्यात् क्रूरैरेवं शुभैः शुभम्। यस्मिन्राजाभिषिक्तोभवति तदाभिषेचनिकभम् श्र ह उ ए कृत्तिका श्रो वि वु रोहिणीत्यादिदेशभम् (चक्रशब्दे १२४८पृ०शतपदचक्रं दृश्यम्)। उग्रादिगणादिकार्य्यभेदः मु० चि० उक्तो यथा "उत्तरात्रयरोहिण्यो भास्करश्च ध्रुवं स्थिरम्। तत्र स्थिरं बीजगेहशान्त्यारामादिसिद्धये। स्वात्यादित्ये श्रुतेस्त्रीणि चन्द्रश्चापि चरं चलम्। तस्मिन् गजादिकारोहो वाटिकागमनादिकम्। पूर्वात्रयं याम्यमघे उग्रं क्रूरं कुजस्तथा। तस्मिन् घाताग्निशाठ्यानि विषशस्त्रादिसिध्यति। विशाखाग्नेयभे सौम्यो मिश्रं साधारणं स्मृतम्। तत्राग्निकार्य्यमिश्रं च वृषोत्सर्गादिसिद्धये। हस्ताश्विपुष्याभिजितः क्षिप्रं लघु गुरुस्तथा। तस्मिन् पण्यरतिज्ञानं भूषाशिल्पकलादिकम्। मृगान्त्यचित्रामित्रर्क्षं मृदु मैत्रं भृगुस्तथा। तत्र गीताम्बरं क्रीड़ा मित्रकार्य्यं विभूषणम्। मूलेन्द्रार्द्राहिभं सौरिस्तीक्ष्णं दारुणसंज्ञकम्। तत्राभिचारघातोग्रभेदाः पशुदमादिकम्। मूलाहिमिश्रोग्रमधोमुखं भवेदूर्ध्वास्यमार्द्रेज्यहरित्रयं ध्रुवम्। तिर्य्यङ्मुखं मैत्रकरानिलादितिज्येष्ठाश्विनानीदृशकृत्यमेषु"।

**ताराकूट** न० दम्पत्योर्विवाहशुभाशुभज्ञापके कूटभेदे उपयमशब्दे १२४८ पृ० दृश्यम्। "वर्णो वश्यस्तथा तारा योनिश्च ग्रहमैत्रकम्। गणामित्रं भकूटञ्च नाडी चेते गुणाधिकाः" मुहू० चि०। [भेदे तारकाक्षशब्दे दृश्यम्।

**ताराक्ष** पु० तारकाक्षापरपर्य्यायके तारकासुरस्य पुत्रे दैत्य-

**ताराचक्र** न० तन्त्रोक्ते दीक्षणीयमन्त्रशुभाशुभज्ञानार्थे चक्रभेदे तत्स्वरूपादि चक्रशब्दे २८०६पृ०नक्षत्रचक्रे दृश्यम्।

**ताराचमन** न० तारायाः पूजाद्यङ्गमाचमनम्" शा० त०। तारादेवीपूजाद्यङ्गे आचमनभेदे तच्च भैरवतन्त्रे उक्तं यथा "ताराभेदैस्त्रिभिः पीत्वा मायया क्षालयेत् करम्। ॐ औशौ तु हिरुन्मृज्य फट्कारैः क्षालयेत् करम्। आस्यं नासे दृशौ श्रोत्रे नाभिवक्षःशिरोभुजान्। वैरोचनादिभिः स्पृष्ट्वा सर्वपापैः प्रमुच्यते। आचम्य भैरवो भूत्वा वत्सरान्तां प्रपश्यति"। ताराभेदैरिति। उग्रतारैकजटानीलसरस्वतीभेदैः। वैरोचनादयस्तु। वैरोचन, शङ्ख, पाण्डर, पद्मनाभ नामक, मामक, पाण्डुर, तारकाऽसिताङ्ग, यमान्तक, विघ्नान्तक, नरान्तकाः, सचतुर्थीप्रणवादिनमोऽन्तकाः" कृष्णानन्दतन्त्रसा०।

**ताराधिप** पु० ६त०। १चन्द्रे २शिवे ३बृहस्पतौ ४वालिवानरे ५सुग्रीवे च। "ततार ताराधिपखण्डधारी" कुमा०। "ताराधिपे बलिनि लग्नगतेऽथ वास्मिन्" ज्यो०त०। तारापतितारानाथादयोऽप्यत्र। "कठोरतारापतिलाञ्छनच्छविः" माघः। ६नक्षत्राधिपेषु अश्विनीकुमारादिषु ताराशब्दे दृश्यम्।

**तारापथ** पु० ताराणां पन्थाः अच् समा०। आकाशे हला०

**तारापीड़** पु० ताराणामापीड़ः भूषणमिव। चन्द्रे त्रिका०।

**ताराप्रमाण** न० अश्विन्यादिनक्षत्राणां स्वरूपावेदकसंख्याविशेषे स च वृ० सं० ९८ अ० सप्रयोजनमुक्तो यथा

"शिखिगुणरसेन्द्रियानलशशिविषयगुणर्तुपञ्चवसुपक्षाः। विषयैकचन्द्रभूतार्णवाग्निरुद्राश्विवसुदहनाः। भूतशतपक्षवसवो द्वात्रिंशच्चेति तारकामानम्। क्रमशोऽश्विन्यादीनां कालस्ताराप्रमाणेन। नक्षत्रजमुद्वाहे फलमब्दैस्तारकामितैः सदसत्। दिवसैर्ज्वरस्य नाशो व्याधेरन्यस्य वा वाच्यः"।

**ताराभूषा** स्त्री तारा भूषा यस्याः। रात्रौ राजनि०।

**ताराभ्र** पु० तारो निर्मलः जलशून्यः अभ्रो मेघ इव शुभ्रत्वात्। कर्पूरे राजनि०।

**तारामण्डल** न० ताराणां मौक्तिकानां मण्डलं यत्र। ईश्वरमण्डपभेदे शब्दरत्ना०। ६त०। २नक्षत्रमण्डले च।

**तारामृग** पु० तारारूपः मृगः मृगशिरः। मृगशिरोनक्षत्रे "अन्वधावन् मृगं रामो रुद्रस्तारामृगं यथा" भा०व०२७७ अ० "तारारूपं मृगम् तारामृगं, प्रजापतिः स्वां दुहितरं मृगो भूत्वा जगाम तस्य रुद्रः शिरोऽच्छिनत् तदेव मृगशिरो नक्षत्रम्" नीलक०। "एष चैव मृगः श्रीमान् यश्च दिव्यो नभश्चरः। उभावेतौ मृगौ दिव्यौ तारामृगमहीमृगौ" रामा० अर० ४३।२।स०।

**तारारि** पु० ६त०। विटमाक्षिके उपधातुभेदे हेमच०।

**तारावती** स्त्री ककुत्स्थराजभार्य्यायां मनोन्मथिन्यां जातायां दुर्गावतारभूतायां कन्यायां शिवावतारचन्द्रशेखरपत्न्याम्। तत्कथा कालिकापु० ४७ अ० यथा।

"काकुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत्। सहजेनाथ हारेण भूषिता सा ककुत्स्थजा। ववृधे मन्दिरे तस्य वर्षास्विव सुरापगा। तेनैव हारचिह्नेन तस्यास्तारावतीति वै, नामाकरोत् पिता काले यथोक्ते नृपसत्तम!"। "पतिं पूर्ववरं पुत्री राज्ञस्तारावती सती। स्वयं सा पार्वती देवी वव्रे च चन्द्रशेखरम्। वैवाहि-